मनयावके॥ ब्रह्मौदनादिकं सिद्धं कृत्वाग्न्याधिविधानतः॥ पवित्रेष्टिं तनुमतीं त्वै धातव्यां क्रमाद्यजेत्॥ रोद्राग्नेनैव यपशुना यष्ट्वं
केवले न वा॥ अथवा पुनराधानमेवात्रेष्टं न चेतरत्॥ धर्मप्रजासमृद्ध्युद्दारे मुयदिलोभतः॥ अन्यां तु समुद्वहेद्दारांस्तद्यद्वौदितं
विधिं॥ अनुद्धायमगारेष्वायजेते वात्मशुद्धये॥ नाद ध्यायानागारे ष्टिं एवं पत्न्या सहाचरेदिति॥ अत्राह भगवान्बोधायनः॥ यद्याहि
ताग्नेः प्रजा नोत्पद्येत कथं तत्र कुमारि ॰ सेस्कस्य द१ मेहन्येकादशा वारण्योरग्नीत्समारोप्योदवसाय मथित्वाग्नीन्विहृत्योद्वासने
ष्टे घृतहि निमे वारण्योरग्नीत्समारोप्यौयसने ब्रह्मौदनं ॰ अथयित्वोयसस्य प्रश्नति प्रसिद्धमग्न्याधेयं कुर्वन्ति॥ तस्मिंस्त्वांस्थितेयवि
त्रेष्ट्या यजेत तस्या ॰ से ॰ स्थितायां तनुमतीं निर्वपेत् सस्याः ॰ स ॰ स्थितायां त्रैधातवीयां निर्वपेदपि वैं द्राग्नेन पशुना यत्रेत पुनरा
धायं वा कुर्यादथ्यपधेको बहुर्जायाः प्रयुञ्जान एवमेवैतत्कुर्यात् तस्मादेको बहुर्जाया विन्दत इति ब्राह्मणमिति॥ इत्यग्निसेद्यसंसर्गविधिः॥
अथाहिताग्निव्रतानि॥ आधानाद्दशरात्रमाहिताग्निर्व्रतचारी स्यात् तदुक्तं॥ नानृतं वदेत् न मांसमश्नीयात् न स्त्रियमुपेयात् न

वासः प्रक्षालयेत् नमन्मयेन पिबेत्॥ नमस्त्रपोछिद्रं दघात्॥ नयादौ प्रक्षालयित्न लवणमश्नीयात् नकोशीधान्यमश्नीयात्॥
अन्यत्र निलेप्यः नासंध्यां शपीत कालयोर्भोजनं कुर्यात्॥ आज्यमेवं हविष्यमश्नीयात्॥ नान्यस्यादिन्नं कुर्यात्॥ नाजीतना
प्युंजीत न दंतधावनं कुर्यात् एतानि व्रतानि रात्रौ ये व्रातयः ते स्त्रिजनेग्नये व्रतये स्वाहेति पूर्णाहुतिं कुर्यात् इत्यनधिकारत्॥
अजातपुत्रस्य ऋतुभार्यागमनेन इत्याहिताग्निधर्माः॥ तदतिक्रमे प्रायश्चित्तान्यभिधीयंयाद प्रक्षालने दोषः॥ पर्णादिना दंत
धावने च॥ इत्याहिताग्निधर्माः॥ तदतिक्रमे प्रायश्चित्तान्यभिधीयंते॥ आहिताग्नेर्यथा तृणादिना दंतधावने च॥ इत्याहि
ताग्निधर्माः॥ तदतिक्रमे प्रायश्चित्तान्यभिधीयंते। आहिताग्निर्दोष्यात् प्राणादिभरादिभक्षणो लिखित आह। तृण्याहकदार
सेयावयहाप्रपशुकुली: आहिताग्निर्द्विजो भुक्त्वा प्राजापत्यं समाचरेदिति॥ अनाहिताग्नेः पुनार्दशी एकरात्रे सायं यथः यानंनाभे
रूर्ध्वं द्विरात्रं॥ वक्त्रे त्रिरात्रं॥ मस्तके च तूरात्रमित्यंगिराः॥ इदं च सम्यग्दृष्टविषये॥ ईषद्दृष्टे नाभेरधः आपोहिष्ठीयादिभिः
स्नाने प्राणायामत्रयं च॥ नाभेरूर्ध्वं द्विगुणं वक्त्रे त्रिगुणं मस्तके चतुर्गुणमिति स्मृत्यर्थसारोक्तेः॥ इदं च श्वशृगालपुंश्चलीवान
नारखरोष्ट्रनरवाराहमृगामध्यजाविनकुलमार्जारकुक्कुटकाकमूषकाद्युपलक्षणं॥ यत्तु पार्श्वे पैठीनसिः॥ गर्गो ष्ट्रवृषभं
नारीसमारूह्याथवाद्यमानः॥ योजने याजने कृच्छ्रमग्निश्चापि विनश्यतीति॥ अनग्न्यारोहणनिषेधो ब्राह्मणस्यैव॥ एतं

गन्नारोहणस्यस्मकस्युपुराणेषु दर्शनात॥ यस्यछत्रेहयश्चैव कुंजरारोहणमद्धिमत॥ ऐंद्रस्थानमुपासीततस्मात्तन्नविचारयेत॥ इतिमार्कं
३· ३० र्कंडेयपुराणाच्च॥ याज्ञवल्क्यः अग्निहीनस्य शूद्रस्यनान्नमद्यादनापदीति। एतदन्यतमान्यभोजनेप्रायश्चित्तमाहमनुः भुक्त्वा
तोन्यतमस्यान्नममत्याक्षपयेत्त्र्यहं। मत्याभुक्त्वाचरेत्कृच्छ्रमिति॥ आपदितुसकृद्भुक्त्वा एकोपवासरूपोब्रह्मकूर्चः अज्ञानाद
नादनायद्यपि स एव॥ ज्ञात्वानायद्यपिसकृद्भोजने प्राजापत्यः॥ प्रसन्नकूर्चस्यत्र्यहेणविकल्पः शक्ताशक्तविषयः अत्रभोजनं
नगलान्नसंयोगमात्रं किंत्वाघ्राणाद्यपीति पाराशरः घ्रात्वाचैवोष्मणाचैवसम्बुद्ध्याचप्रतिग्रहाच्च॥ प्रशस्तस्वास्तिचेत्स्यात्क्व
भोक्तैवतुनसंशय इति॥ स एव॥ अनुग्रहेण्वस्वामिमनुनाचोदितंपुरा॥ आमंवायदिवापक्वंशूद्रान्नमुपसाधयेत॥ किंच
वा भोजनोभोक्तायश्चाविप्रः पुरोहितः गुर्वर्थमतिथीनां चभृत्यानां चविशेषतः॥ प्रतिग्रहस्प्रहातव्यं नतु तृप्येत्स्वयंततः
शूद्रान्नरसपुष्टस्य आधीयानस्यनित्यशः॥ जपतोजुह्वतोवापि गतिरूर्ध्वं नविद्यते॥ षण्मासमयियोभुंक्ते शूद्रान्नंचनिरंतरं॥
जीवन्नेवभवेच्छूद्रोमृतश्वाचापिजायते॥ अक्षत्वैवंनिहन्तिंयः शूद्रान्नाज्जायतेद्विजः॥ आहिताग्नि विशेषेण
सशूद्रगतिभाग्भवेत इतिव्यासः॥ शूद्रान्नरसपुष्टस्य दिव्योरपि चनित्यशः॥ जपतोजुह्वतोवापि गतिरूर्ध्वं नविद्यते॥
मृतसूतकपुष्टांगोद्विजः शूद्रान्नभोजनः॥ अहमेवनजानामिकांकांयोनिंसगच्छति॥ गृध्रोद्वादशजन्मानिसूकरः श्वा

चैवसमनन्नमनित्येवं मनुरब्रवीत् ॥ शूद्रान्नोनोदरस्थेन यः कश्चिन्म्रियते द्विजः स भवेत्सूकरो ग्राम्यस्तस्य वा जायते कुले इ

ति ॥ ग्रायस्तेवः यस्तु भुंजति शूद्रान्नं मासमेकं निरंतरं ॥ इह जन्मनि शूद्रत्वं मृतश्चाचाभिजायते ॥ शूद्रान्नं शूद्रसंस्पर्शः

शूद्रेण च सहासनं ॥ शूद्राज्ज्ञानागमश्चैव ज्वलंतमपि पातयेत् ॥ आहिताग्निस्तथा विप्रः शूद्रान्ने च प्रवर्तते ॥ पंचास्य च प्रणश्यं

ति आत्मा ब्रह्म त्रयोग्नयः इति ॥ स्मृतं तु राजान्नं तेज आदत्ते शूद्रान्नं ब्रह्मवर्चसं ॥ आयुः सुवर्णकारान्नं यशश्चर्मावकर्त

नः ॥ कारुकान्नं प्रजां हंति बलं निर्णेजकस्य च ॥ गणान्नं गणिकान्नं च लोकेभ्यः परिकृंतति ॥ स्मृ पांचिकित्सकस्यान्नं पुंश्चल्यास्त्वन्न

मिंद्रियं ॥ गणान्नं गणिकान्नं च लोकेभ्यः परिकृंतति ॥ स्मृ पंचिकित्सकस्यान्नं पुंश्चल्यास्त्वन्नमिंद्रियं ॥ विष्ठा वार्धुषिकस्या

न्नं शस्त्रविक्रयिणो मलं ॥ एते भ्योन्ये त्वभोज्यान्नाः क्रमशः परिकीर्तिताः ॥ तेषां त्वगस्थिरोमाणि वदंत्यन्नं मनीषिणः इति ॥ तथा

योगहित्वा विवाहाग्निं गृहस्थ इति मन्यते ॥ अन्नं तस्य न भोक्तव्यं वृथापाकः स उच्यते ॥ वृथापाकस्य भुंजानो प्रायश्चित्तं चरेद्द्विजः ॥

प्राणायामं त्रिरभ्यस्य घृतं प्राश्य विशुध्यतीति ॥ आपदि शूद्रात्सकृदन्नप्रतिग्रहे दिनांतरभोजने न दोषः ॥ अनापदि त्वामप्रतिग्र

हे पि सकृत्त्रिनक्तं ॥ अभ्यासे तु मासं कृच्छ्रं त्रिरात्रं ॥ अत ऊर्ध्वमाहतिः श्रोत्रियागारैः शूद्रादिभिः स्वद्रव्ये दत्वा त्रिरग्नहेपि सकृत्त्रि

रात्रं ॥ अभ्यासे तु मासं कृच्छ्रं त्रिरात्रं ॥ अत ऊर्ध्वमाहतिः श्रोत्रियागारैः शूद्रादिभिः स्वद्रव्ये दत्वा कगीरस्वपर्याप्यान्नं तत्र द्विजन्ने चा

ब्राह्मणमिति माधवः ॥ स्मृतिचंद्रिकायां मनुः ॥ येभ्यः शूद्रादधिगम्यार्थमग्निहोत्रमुपासते ॥ ऋत्विजस्ते हि शूद्राणां ब्रह्मवादिषु गर्हिता इति ॥
यमः ॥ उपादाय धनं शूद्रात्तु विप्रोऽभिक्षेत धर्मवित् ॥ यजमानस्तु भिक्षित्वा चांडालः प्रेत्य जायत इति ॥ यत्रैव श्लोकः ॥ चांडालो जायते य
ज्ञे करणाच्छूद्रभिक्षितादिति ॥ मनुः यज्ञार्थमर्थं भिक्षित्वा यो न सर्वं प्रयच्छति ॥ स याति भासतां विप्रः काकतां वा शतं समाः ॥ यमः
यः क्रत्वर्थं भिक्षितं द्रव्यमन्यत्रापि वियोजयेत् ॥ श्राद्धादौ स्यां दयात्ते यो भासयोनिं च गच्छतीति ॥ यानि तु त्रिकांडमंडने वचनानि ॥
निर्धनो धनसाध्येषु नित्येष्वधिकृतो यदि ॥ चौर्यादन्यैः कुमार्गैरपि स्वार्थं धनमार्जयेत् ॥ स्वर्यंत्रगेहे कुरुक्षेत्रे मेषीक्रयधरजिनादिकं ॥ चांडाला
त्प्रतिग्रहापि यज्ञे दावश्येकैर्मखैरिति ॥ तानि दृष्टप्रतिग्रहानुग्राहकाणि किंतु नित्यकर्मणामावश्यकद्योतकानि यदा यज्ञांगो
पयोगमध्ये कथंचित्प्रतिबद्धस्तदानुष्ठप्रदेस्तदहत्यारब्धं कर्म समापनीयमेवेत्याह मनुः यज्ञश्चेत्प्रतिबद्धः स्यादेकेनांगेन यज्वनः ब्रा
ह्मणस्य विशेषेण धार्मिके सति राजनि ॥ यो वैश्यः स्याद्बहुपशुर्हीनक्रतुरसोमपः ॥ कुटुंबात्तस्य तद्द्रव्यमाहरेद्यज्ञसिद्धये ॥ आहरे
त्त्रीणि वा द्वे वा कामं शूद्रस्य वेश्मनः ॥ यो नाहिताग्निः शतगुरयज्वा च सहस्रगुः ॥ तयोरपि कुटुंबाभ्यामाहरेदविचारयन्निति ॥ विशे
षेति क्षत्रियादेरपि प्रत्यक्षे प्रतिबंधे कथंचिदपि समापनं विधीयते ॥ एवमपि द्रव्यलाभे त्रिकांडमंडनस्थवचसोऽप्रवृत्तिः ॥ परं तु
तदुष्टप्रतिग्रहेण यज्ञादिकारणे न तस्य प्रायश्चित्तं भवत्येव ॥ तदाह मनुः ॥ जपित्वा त्रीणि सावित्र्याः सहस्राणि समाहितः मासं गो

ष्ट पयः पीत्वा मुच्यते सत्प्रतिग्रहादिति ॥ समाहितः ब्रह्मचारी ॥ मासं गोष्ठे वसन् अन्वहं त्रिसहस्रं जपेत्पयश्च पिबेदित्यर्थः अभ्यासेन तु हरिः ॥
पवित्रेष्ट्या विमुच्यते सर्वैर्घोरैः प्रतिग्रहैः ऐन्द्रेण मृगारेष्ट्या केचिच्च मित्रविन्दया ॥ षष्ठेकाले पयोभक्षः पूर्णे मासे प्रमुच्यते तर्पयित्वा द्विजा
न्कामैः सततं नियतव्रत इति ॥ प्रतिग्रहे सत्त्वं देशतः ज्ञातितः स्वरूपतश्चेति ॥ अन्यतरसत्वे पूर्वत्रिशन्मते पानित्रेष्ट्या मृगारेष्ट्या मित्रविं
दया च विकल्पो न विधानात् ॥ पवित्रेष्ट्यादयो वक्ष्यन्ते ॥ यत्तु पाराशर्ये ॥ राजप्रतिग्रहो घोरो मध्वास्वादो विषोपमः पुत्रमांसं वरं भोक्तुं न तु रा
ज्ञः प्रतिग्रह इति ॥ तथा न कुर्यात्कौषिवाणिज्यं सेवावृत्तिं तथैव च ॥ ब्राह्मणः पाठीयत्नेन नतस्नातं च विवर्जयेत् ॥ ग्राममध्ये स्थितो या
वच्छवास्ति धतिकस्य चितः ॥ ग्रामस्यनस्य चाशौचं निर्गते शुचितामियात् इति मनुविहितस्याशौचस्यापवादमाह ॥ पाराशरः ॥ ब्रह्म
चारी गृहे येषां हूयते च हुताशनः ॥ संपर्कं न च कुर्वीति न तेषां सूतकं भवेत् इति ॥ तथा ॥ राजान्नदानायितरावाचार्त्विक्पुरोहिताः ॥ ए
ते यो याचेत कृत्स्नेऽपि तु प्रसाद्यैव विमुच्यते इति ॥ तथा ॥ अन्नदो भयतश्चैव तथा ऋत्विक्पुरोहिताः ॥ एते गुरुसमा ज्ञेया नैषु प्रति मुख
वत् ॥ तथा यावद्गुरुर्ब्रूयात्तत्कार्यमविशंकया ॥ निग्रहेनुग्रहे वापि गुरुः सर्वत्र कारणमिति ॥ अथ नैभवतियः पापयक्ष्मा ग
हीतः स्याघ्नो वापरध्येत ॥ देवेभ्यः ऋषिभ्यः पितृभ्यो यो ब्राह्मणेभ्यः स्तेयेनाभिशस्तोऽभिशस्यमानो वा रहस्येष्ट्या यजेतेति बोधा
यनः ॥ तथा ॥ उपास्य पश्चिमां संध्यां हुत्वाग्निं समुपास्य च ॥ भृत्यैः परिवृतो भुक्त्वा नातितृप्तोऽथ संविशेदिति द्वितीयभोजनस्याव

ष्पकत्वं ॥ तत्रैौ भार्यामुपेयादित्यत्र नियमविधिं साधयता मितामिताक्षराकारेण सायंप्रातर्द्विजातीनामशनं श्रुतिचोदितं ॥ नांतरा भोजनं कुर्या
३३ द् अग्निहोत्रसमो विधिरित्यत्र नियमार्थत्वेन साधितं ॥ तेन द्वितीयभोजने समर्थेन तदकुर्ता प्राणायामशतं कुर्यात्सर्वपापापनुत्तये ॥ उपपात
३२ कजातानामनादिष्टेषु चैव हि तिप्रायश्चित्तमाचरणीयं ॥ इदमेव सर्वत्रस्मत्युक्ते नादिष्टप्रायश्चित्तं तथा मनुः ॥ वेदोदितानां नित्यानां कर्म
णां समतिक्रमे ॥ स्नातकव्रतलोपे च प्रायश्चित्तमभोजनमिति ॥ एतद्दयनादमाह माधवीये शैवागमः ॥ अत्यंतरोगयुक्ते गेहे जन्मोरभ
यादिषु । गुर्वग्निदेवकार्येषु नित्याहारी न पापभागिति ॥ पर्वणि स्त्रीगमने भोजनमेवेति भूलपाणिः ॥ यदा कदाचा दिवा मैथुने भो
याने वा तदभ्यासे स्नात्वा प्राणायामेन शुद्धिः ॥ अभ्यासे तु शतं प्राणायाम इति मनुः ॥ नयं परस्त्रीद्दष्टा दिनमेकमभोजनमिति भूल
पाणिः ॥ एतस्य च प्रतिपदोक्तप्रायश्चित्तैः समुच्चयः ॥ यथाहिताग्निदुः स्वप्ननिमित्तं अद्भुतादिदर्शननिमित्तं भयं च भ्येत द्वायत
इंद्रस्य भयामहे ॥ स्वस्तिदा विश० ॥ इंद्रो देवता ॥ इदं स्कवाहुतिद्वयं सर्वाधानिनां लौकिकाग्नौ अर्धाधानिनस्मार्ताग्निमत्त्वो पा
सने होतव्यं ॥ अंचो जीय इति शांतद्वयी भार्यो बहुभार्यस्याग्निहोत्रादिशुश्रूषयोर्विशेषमाह माधवीये कात्यायनः ॥ अग्निहोत्रादि शुश्रू
षां बहुभार्यः सवर्णया कारयेत्तद्बहुत्वे च ज्येष्ठया गर्हितानचेत् ॥ तथा च वीरसरसां आज्ञासंपादिनी च या ॥ दक्षा प्रियंवदा शुद्धा ता
मत्र विनियोजयेत् ॥ निरक्रमेण वाक्यं यथा ज्येष्ठमशक्तितः ॥ विभज्य सह वा कुर्युर्यथा ज्ञानमशक्तितः इति प्रजापतिः ॥ दर्शं च

पौष्ठे ऽथ मासे चन्द्रक्षयमेव वा॥ एकस्मिन्कृच्छ्रपादेन प्रायो द्वे नशौचने॥ हविर्यज्ञे यज्ञ सत्यलुप्तमध्ये कमादितः॥ आज्ञायत्वेन प्रयुध्येति
पाकसंस्थासु चैव हि॥ संध्योपासनहानौ तु नित्यस्नाने विलुप्य च॥ होमे नौमित्तिके भ्रष्टे याम्याप्रायसहस्रकृत॥ समाप्ते सोमयज्ञानो हानौ
चान्द्रायणं चरेत॥ अकृत्वा न्यतमं यज्ञं यज्ञानामधिकारतः॥ उपवासेन प्रयुध्येत पाकसंस्थासु चैव हि॥ कात्यायनः॥ पितृयज्ञात्यये चै
व वैश्वदेवात्यये पि च॥ अनिष्ट्वा नवयज्ञेन नवान्नप्राशने तथा॥ भोजने पतितान्नस्य चरुर्वैश्वानरो भवेत् इति तु स्मार्तविषयं॥
आहिताग्नेरिष्टिविधानात्॥ तथा॥ विकच्छोनुत्तरीयश्च नग्नश्चावस्त्र एव च। श्रौते स्मार्ते तथा कर्मन् नग्नाश्चितये दपि॥ नग्नो मलिव
न वस्त्रः स्यान्नग्नश्चार्द्रपटः स्मृतः॥ नग्नस्तु दग्धवस्त्रः स्यान्नग्नश्छिन्नपटस्तथेति॥ धौतवस्त्राभावे पात्रं वल्कलं॥ आलाभे धौतव
स्त्रस्य शाणक्षौमाविकानि च॥ कुतपे योगपट्टे च द्विवासा स्कन्द वै भवेदिति॥ कुशधारणमाह॥ शातातपः जपे होमे च दाने च स्वाध्या
ये पितृतर्पणे॥ अशून्यं तु करं कुर्यात्सुवर्णरजतैः कुशैरिति॥ अस्नातस्य होमनिषेधमाह॥ दक्षः अस्नात्वा नाचरेत्कर्म जप्यहोमा
दिकं न चेति॥ प्रातःस्नानसंक्षेपमाह व॥ अत्यन्त्वा होमकालस्य न हरत्वात्स्नानकर्मणः॥ प्रातः संक्षेपतो स्नानं होमलोपो विगर्हितं इति
उर्ध्वपुण्ड्रस्यावश्यकतोक्ता ब्रह्मांडपुराणे॥ यज्ञकाले च होमे च सायं प्रातः समाहितः॥ नामान्युच्चार्य विधिना धारयेदूर्ध्वपुण्ड्रकमिति॥
होमकाले अथ रोगस्पर्शनिषेधं बाह्लिःपमं चाह बौधायनः॥ नाभेरधस्पर्शं कर्मसंयुक्तो वुर्जयेदिति॥ जपकाले न भाष्येत व्रतहोमा

…कं वुचेति ॥ लोयेयाज्ञवल्क्यः ॥ यदिवाग्यमलोपः स्याज्जायादिपुकदाचन ॥ व्याहरेद्वैष्णवं मंत्रं जपेद्वापि यजुरव्ययमिति ॥ दक्षः ॥ संध्याकर्मावसा
नेन्द्रस्वयंहोमोविधीयते ॥ स्वयंहोमफलंयत्स्यात्तदन्येननलभ्यते ॥ होमेयत्फलमुद्दिष्टं जुहतः स्वयमेवतु ॥ हूयमानेतदन्येनफलमर्द्धंप्रपद्यते ॥
कक्रविकपुत्रोगुरुर्भ्राताभागिनेयोथविट्पतिः ॥ एतैरपिहुतंयस्मात्तद्धुतंस्वयमेवतु ॥ हेतनारतस्यमाहात्रिः ॥ अन्यैः शान्तहुताद्धोमादेकः शिष्य
33 हुतोवरं ॥ शिष्यैः शान्तहुताद्धोमादेकः पुत्रहुतोवरं ॥ पुत्रैः शान्तहुताद्धोमादेकआत्महुतोवरमिति ॥ यजमानयोरसान्निध्येहोमस्यनैष्फल्यमाहगो
पालः ॥ असमक्षंतुदंपत्योर्होतव्यंनर्त्विकादिना ॥ द्वयोरप्यसमक्षंतुभवेद्धुतमनर्थकमिति ॥ कात्यायनः इतिकात्यायनः ॥ आह नाल्पविद्यो
नबालिशः ॥ होतास्यादग्निहोत्रस्य नार्तोनासंस्कृतस्तथा ॥ नरकंहिपतत्येतेनजुहतः सचयस्यतत् ॥ तस्माद्वेतानकुशलोहोतास्याद्वेद
पारगइति ॥ संध्यानुष्ठानस्यबहिर्देशप्राशस्त्येपि ॥ उभेसंध्येतुकर्तव्येब्राह्मणेनगृहेष्वपीतिविधानमाहिताग्निपरं ॥ तस्यापिउद्धरणा
न्तरं आहोमसमाप्तेर्बहिर्गमननिषेधात् ॥ अतएवकेशवोध्वर्युरपिविरणान्तरं विहारमेध्यएवसंध्यानुष्ठानमाह ॥ नचसंध्याहोमयोः स
मानकालतायांप्रारब्धंतंत्र्यात्वाद्धोमस्यप्राधान्येनसंध्योत्कर्षशंकाः ॥ संध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु ॥ यदन्यात्कुरुते
कर्मनतस्यफलभाग्भवेदिति ॥ दक्षवचसामुत्कर्षविधानात् ॥ त्रिधाविभक्तस्याह्नोद्वितीयभागः समित्कुशाद्याहरणकालः ॥ समि
त्कुशाद्याकुशादीनांसकलः समुदाहृतइतिदक्षोक्तेः ॥ आहिताग्नेर्वृथाप्रवासनिषेधोमार्कंडेयपुराणे ॥ प्रशस्तेनमप्रवासोब्राह्मणा

नो कथंचन॥ सतोऽग्रे हि द्विजाग्न्यस्यानिष्पत्तिः सर्वकर्मणां॥ नित्यनैमित्तिकानां तु हानिरेव प्रवासिनां॥ नित्यनैमित्तिकानां हि हान्या
हानिर्द्विजन्मनां॥ सायं प्रातर्हुतं हव्यं लोकान्यच्छति शाश्वतान्॥ त्रैलोक्यमेतु दाखिलं हव्य एव प्रतिष्ठितं॥ अभीक्ष्णं बहिषः शय्या
सततं च त्रयोऽग्नयः॥ रक्ष्यं चैवाग्निशरणं वेदिर्विशारणी तथा॥ नाशो गार्ह्यापविप्राणां शय्यते हि वरूथिनी॥ इह कूशा थ वि
प्राणो वेश्या चेत्फलं लायच॥ यज्ञेण कर्महान्याच प्रयात्स स्यप्यतो नरः॥ त्रियेकडंकरीयेवारामन्नच्छन्यावर्तिनो॥ यावत्कृत्स्नं च विप्रे
षु नियतो नेतुरत्नकरति॥ नित्यकर्मपर्याप्तद्रव्यस्य प्रवासे विनालाभे तु द्रव्यार्जनार्थं प्रवसेन्न तु तीर्थाद्यर्थे न तु व्रजेदिति॥ तत्काम्य
तदाह त्रिकांडमंडनः॥ धनान्यर्जयितुं युक्तः प्रवासो ह्यग्निहोत्रिणः॥ धनैर्हि श्रंशवे दिग्न्यातीर्थाद्यर्थे न तु व्रजेदिति॥ तत्रा
प्यवधिमाह देशान्तः कालतश्च स एव॥ अग्निहोत्रेण रहितः पंचाशद्योजनं नं॥ आहिताग्निः प्रयायाच्चेदाग्निहोत्रं विनश्य
ति॥ अशंस्वयमनुक्तो नोहावयेद्दत्विगादिषा॥ न स्यात्सु नराधानं पवित्रे स्थिरधायिवेति॥ बोधायनः॥ यथो एवत्सो परिमितं प्र
वसति न संवत्सरमति प्रवसति इत्यविशेषा॥ जायापत्योरहिताग्न्योर्विज्ञापनेऽर्द्धं ह वा एष आत्मनो यत्पत्नीति॥ तेन प
त्नी प्रवासे वसति रत्नविज्ञे स्थिरधायिवेति॥ बोधायनः॥ यथो एवत्सो परिमितं प्रवसति न संवत्सरमति प्रवसति इत्यविशे
षा॥ जायापत्योराहिताग्न्योर्विज्ञापनेऽर्द्धं ह वा एष आत्मनो यत्पत्नीति। तेन पत्नीप्रवासेऽपि तत्रायश्चितं॥ स्मार्ताग्नि

नश्चंद्रिकायां पैठीनसिः प्रसवलीकृतधर्मस्यपीड्यमानस्य शक्तिभिः॥ मासद्वयं प्रवासोऽस्ति परतो नाहिताग्निवदिति॥ आहिताग्नि
स्तु योऽलोभात्प्रवासं पर्वसंधिषु॥ करोति पुनराधानं प्रायश्चित्तमनाहतौ॥ यज्ञपार्श्वे॥ नाग्निकार्यस्य वेलायां प्रवसेन्न च पर्वणि॥
न विना च निमित्तेन क्रीडार्थं च न तु व्रजेदिति॥ अपरिमितं प्रोष्य तु उपवसथसमीये त्रयोदश्यां वा चतुर्दश्यां वा नागच्छेत्॥ सोऽधः
शायी न प्रवसेत्॥ आमिषवर्जं भुंजीत॥ बुहृपलौकएकपासहे छेत्रे नैमुथुनं न कुर्यादिति केशवः॥ एकपासहगमननिषेधः
क्रमो ऽनाभ्युदयविषय इति चंद्रिकायां॥ ब्रह्माण्डपुराणे॥ अनापद्यपि धर्मेण यान्यतः शिष्यतस्तथा॥ गृह्णन् प्रतिगृह्णन् वि
प्रो न धर्मैः परिहीयत इति॥ तथा॥ आहिताग्निरनड्वांश्च ब्रह्म ब्राह्मचारी तथैव च॥ अश्नंत एव सिध्यंति नैषां सिद्धिरनश्नता
मिति॥ यज्ञपार्श्वे॥ पराग्निपक्वं नाश्नीयं प्रवासेनाग्निहोत्रिणा॥ इक्षुक्षीरविकाराश्च भक्ष्य भृ पृथवा अपि॥ यदन्नं वारिहीनं च
पक्वं केवलपावके तदन्नं पल्लवद्ग्राह्यं भ्रष्टाद्यपि न दुष्यति॥ स्वर्णं तु विधानान्यपाचितं जातवेदसि॥ तदन्नं फलवद्ग्राह्यं भ्रष्ट
द्यपि न दुष्यति॥ तंडुलो ऽम्बुसंयोगात्सिद्धः कृवणयोगतः॥ पानीयमन्नसंयोगात्फलं त्रितयमोगतः॥ पराग्निपक्वं नाश्नीया
तु द्रोगोरसमंतरा॥ अ आहिताग्नेरयं धर्मो याज्ञिकानानुसंमत इति॥ बृहस्पतिः सर्वाधान्यथवा चार्धाधानी वा प्यावसथ्यकं
परस्य रंतुभुंजीयुरविरूढं स्वपोमनाऽइति॥ वृद्धशौनकः॥ सर्वाधानिदक्षिणाग्नौ स्मार्तयाकादिकं चरेत्॥ तदर्थमेसरो

यो न्वते कर्मणि लौकिकः॥ प्रचेताः॥ कृते होमे तु नचस्मात्कदाचिद्दक्षिणाग्निकः॥ सायंहुत्वा॥ थकर्तव्यं भोजनं विधिपूर्वकं॥ पच
नाग्नौपचेदन्नं नपचेल्लौकिकाग्निके॥ यदि स्यांत्यायचेदन्नं भुक्त्वा चांद्रायणं चरेदिति॥ याज्ञवल्क्यः॥ गृहोत्याग्निं समारोप्य
पयुरान्नं निये वते॥ अभोज्यान्नो गृहस्थो सौवेदवादिपुरोहितः॥ मार्गेन्ने नोदरछेन स्यार्पीसमधिगच्छति॥ यस्यान्नं तस्य ते पुत्रा अ
न्नाद्रेतः प्रवर्तते॥ वरं कंदफलाहारो वरं वायोश्च भक्षणं॥ पुत्रमांसवरं तात न नाग्निगृहभोजनमिति॥ आहिताग्नेः पत्नीसहित
स्याग्नौ चिहायनप्रवास इति पूर्वमेवोक्तं॥ यत्तु विराटपर्वणि नष्टचर्यार्थं भैधौम्येन पुरोहितेन स्वाश्रमं प्रतिनयनेश्रूयते युधिष्ठिरा
णीनां न तदन्येषां ब्राह्मणानां प्रयोजकं॥ तथात्वेषां चालिंगनसर्वधर्माणामन्यत्रायते॥ किंच क्षत्रियकृतन एष वर्याविधोविहि
तस्य पुरोहितकर्तृकाग्निनयनस्य नाहत्वे धानं तान्यत्वे व प्रदर्शते नान्यत्र प्रसिद्धिः॥ भिन्ना एवाहिताग्नेः क्षत्रियधर्माः भिन्ना
श्च ब्राह्मणानां यथाश्वलायनः॥ राजन्यस्याग्निहोत्रं जुहुयात्तत्पात्विने ब्राह्मणाये तरंकालं भक्तमुपहरेद्यत्स त्यशीलः
सोमत्सरदानुहयादिति॥ चशब्दो वैश्योपलक्षणार्थ इति त्रिविक्रमः॥ तथा सोमयागे। क्षत्रियस्य यजमानस्य सोमया ना
भावः श्रूयते न ब्राह्मणस्य॥ तथा राजकार्येषु पुरोहित इति वचने न क्षत्रियकर्मणां पुरोहितकर्तृताया एवाम्नातं तंत्रद्रोत्रता
ते॥ एतेन बलरामतीर्थयात्रायां पत्नीपुरोहिताभ्यामाहरणमग्नीनां च व्याख्यातं॥ इत्याहिताग्निधर्माः॥ अवादे

स्यमनंतेन गुरुणा करुणा ।। धिया धिना ।। आधानगोचरे प्रायश्चित्तं तत्र निरूपितं ।। इत्यनंतदेवीरचिते प्रायश्चित्तकुतूहले आधानप्र
35 करणं ।। ८ ।। ॐ नमो वितंउतुंडाय शशिखंडांक धारिणे ।। हारिणे सर्वविघ्नानां पार्वतीप्रियसूनवे ।। १ ।। अथाग्निहोत्रहोमप्रायश्चि
त्तान्युच्यंते ।। तस्यानिहण कालः पूर्वेद्युरुक्तकालोऽभिधीयते ।। तत्र कात्यायनः ।। सूर्येऽनुशैलमप्राप्ते षट्त्रिंशाद्भिरिहांगुलैः ।। प्रादुष्करणमग्नी
नां प्रातर्भासां च दर्शनं इति ।। प्रयोगपारिजाते परिशिष्टे ।। अस्तमिते आदित्ये सायमग्नेः प्रादुष्करणं उदिते प्रातरिति ।। अस्तमिते अस्तंग
तीति ।। उदिते उदयं गच्छतीति ।। व्याख्याभिधानात् ।। अपराह्णे हूयस्व नु र्थभाग इति त्रिवृद्धिवरणाच्चेति वाच्यं ।। स्मार्ते पितृस्याग्नि
होत्रेण प्रादुष्करणहोमकालो व्याख्यातावित्यतिदेशस्मरणात् ।। विरोधापत्तेः ।। किं च अमावास्यायामपराह्णे पिंडपितृयज्ञ इति
सूत्रात् प्रादुष्करणपितृयज्ञयोरेककालप्राप्तौ होमार्थमाहोमार्थं विहृताग्नित्वेऽपि उ पितृयज्ञानुष्ठानापत्तिः ।। न च तद
हरत्कर्षविधाने ।। वचनाभावात् ।। अतः कात्यायनवचने परिशिष्टं च श्रौत तस्मात् साधारण्येनैव प्राप्तमिति ।। अपराह्णवचनं च
प्रज्वाल्यमात्रविधायकं न तु विहरणस्य ।। प्रज्वाल्यः तेन तस्य वानुगतिश्रमनिरासः प्रयोजकमिति न कश्चिद्विरोधात् ।। अपराह्णे गा
गार्हपत्यं प्रज्वल्य दक्षिणाग्निमानीय विहृतकुण्डाद्दित्ववतो वैकयोनयः इत्येके घ्रियमाणे वा प्रज्वल्याऽरणीसंतते वा मथित्वा गार्हप
त्याद्दाहवनीयाज्वलनं तमुद्धरेदित्संगकलापः माऊ लौकिक्या वापराह्णे अतिप्रयोजिका ।। अत एव प्रायश्चित्तविधौ उदयास्तम

यातिक्रमकीर्तनमेव कृतं नत्वपराण्हस्य॥ यद्यपराण्ह एव विहरणकालः सूत्रकृता विहितः स्यात् इति क्रमे प्रायश्चित्तमभिहितं स्यात्॥
न त्वेतद्गौणकालेप्यनापादि प्रायश्चित्ताभिधानात्॥ अत एवाह बौधायनः॥ पुरादित्यास्तमयात् गार्हपत्यमुपसमाधायान्वाहार्यप
चनमानीय ज्वलेतमाहवनीयमुद्धरेदिति॥ प्रायश्चित्तप्रदीपे तु॥ अग्निनामुद्धरणकालः पुरादित्यस्योदयात् अस्तादित्याचार्येणोक्तत्वा
त् विहरणानंतरमस्तोदयौ यथा भवतः स्यात्तथा विहरेदिति आपस्तंबोपि॥ अधिवृक्षसूर्ये आविः सूर्ये वेति॥ आश्वलायनोपि च॥ उत्सर्गे
पराण्हे इति सूत्रं व्याख्यातं॥ अत्रोत्सर्गो कृते सति अपराण्हे प्रणापनकालेस्तमयात्पूर्वं यजमानः संप्रेष्यति उद्धराहवनीयमिति
ज्वलेपेदपराण्हेग्निमस्तं याते दिवाकरे इति कारिकाव्याख्यायामपि॥ अत्रापराण्हशब्दोस्तमनात्पूर्वकालिनादिनशेषवाचक
इति स्पष्टमेवोक्तमिति न कोपि विरोधः॥ तस्मादपराण्हे सौकार्यार्थं प्रत्वाल्पास्तमयसन्निहितकाल एवोद्धरणं कार्यमिति सिद्धे
अस्य चोद्धरणस्य यः कर्ता स एव होमस्यान्यत्र यजमानात्। होमसंकल्पश्चोद्धरणात्पूर्वमेव कार्यः अथानुद्धरणप्रायश्चित्तं। तत्र
सायं यथा भगवानाश्वलायनः अथाहवनीयमप्रणीतमभ्यस्तमियादुहु विब्राह्मणोग्निं प्रणयेद्भैं हिण्ये उद्ध्रियमाणे इ
ति कालात्ययेन शेष इति च ब्राह्मणग्रहणं बाहुविधत्वेपि ज्ञात्वंतरनिवृत्यर्थमिति। वृत्तिकृत्। कालात्ययेन शेष इति। अग्नि
होत्रमुपसाधभूर्भुवः स्वरिति जपित्वा वरं दत्वा जुहुयादिति श्रुवारूणीति सूत्रशेषः स्यात्प्रायणार्थं। तदित्थं प्रयोगः यजमानः

त्व्यासहतीर्थेन प्रविश्य होमसंकृत्वानुरूपप्रायश्चित्तसंकल्पं कुर्यात्. ततो होतकर्तारं प्रणयनार्थं बहुविदं ब्राह्मणं च हस्ताभ्रासन उप
36 पविशेत्. ततो होमकर्ता दक्षिणाग्निं प्रणयेत्. ततो यजमानेन उद्धृणाहवनीयमिति प्रेषितो बहुवित् परिकर्मिणा हिरण्यं दर्भे रज्जतो ह्रि
यमाणो उद्ध्रियमाणउद्धरथा भन इत्यादिनित्यविधिनोद्धृत्य हिरण्यमन्तर्धाय तत्याद्रिख्रेनपरिकल्थाम ता सुर्तीरित्यादिना निधानं तेकुर्यात्.
अथाध्वर्युः परिसमूहनादि हविरासादनान्तं कुर्यात्. ततो भूर्भुवः स्वरिति जपेत्. ततो यजमानोऽस्मै वरं ददाति. बहुविद इति केचित्.
ततः कर्ता समिदाधानादिहोमशेषं समापयेत्. ततस्तेष्वग्निषु वारुणीष्टिं कुर्यात्. परे त्वेवं निहोत्रालोके. तेष्वेवाग्निषु विहृत्य वेति
प्रायश्चित्तप्रदीपे. परेद्युः पक्षे विहरणं. तदानीमेवेति पक्षे येव. हन्त्रिकृदभिमतमेतत्. अग्निहोत्रमुपसाद्य भूर्भुवः स्वरिति जपित्वाव
रं दत्वा जुहुयादिस्तेत्रिकृयोपसर्जनं क्रियान्तरं विधीयत इति पदार्थस्यैककर्तृकत्वे इति केचित्. वरं दत्वा जुहुयादिति पूर्वकालतामात्रं वि
वक्षितं नाव्यवधानं कर्तृकं त्वेति हन्त्रिकृत्. आहुतिं वा जुहुयादिति ब्राह्मणं तथा इष्टिपूर्णाहुत्यो र्विकल्पः. अपि वा प्रायश्चित्तेष्टौ नास्थाने
तस्यै देवतायै पूर्णाहुतिं जुहुयात्. इति विज्ञायत इति ब्राह्मणानुवादकसूत्रार्थकृता वृत्तिकारेण पञ्चविकल्पो नुपक्रान्तः. दर्शपूर्णमास
स्य भवति दर्विहोमम ध्येचेतियद्धंकेतत्राहत्राहज्ञानदर्पीकारः दर्शपूर्णमासारम्भात्पूर्वं निमित्तसंजननेन सत्यारम्भणायनैमित्तिकाचिन्त्यष्टे
ष्टिः कर्तव्यैव. अग्निहोत्रमध्ये चेत्संक्रान्तमग्निहोत्रे समापयकर्तव्या. तस्मात्सर्वस्य शक्तस्येष्टयं. अशक्तश्चेत् पूर्णाहुतिं यदि तियुक्तमिति.

अत एव बौधायनः ॥ इष्टिः पूर्णाहुतिः स्रुवाहुतिः पूर्वं पूर्वं गरीयं इति। किंच प्रारब्धदर्शपूर्णमासस्यापि यजमानस्य प्रवासादिना सान्निध्ये
क्रियमाणदर्शपूर्णमासप्रयोगप्रविलनाशादिनिमित्तप्राप्ते हीनोत्सृष्टाने पूर्णाहुतिविधिनान्वात्रवहुताव्यवस्था घटते। ॐ अथ वारुण्यप्रयोगः। काले
नुधारणनिमित्ते वारुण्येष्ट्या यक्ष्ये इति संकल्प्य। वरुणाय जुष्टं निर्वपामीति चरुं वा निर्वपेत्। इमं मे वरुण श्रुधी हवमित्यनुवाक्यामुक्त्वा तत्त्वा
यामीति याज्या प्रधानमुख्यां च। चोर्ध्वमासंतते त्रे। वरुण स्वाहं० प्रप्रजपाचय तुहीतेन वा कार्यास क्रुम्वेण वा होमो बौधायनोक्तेः। तत्र देवताना
म्नाचतुर्गृहीतेन वरुणाय स्वाहेति। इति सायमनुधारणप्रायश्चित्तं। अथ प्रातरनुधारणप्रायश्चित्तं। उदिते चतुर्गृहीतमाज्यं रजतं च हिरण्य
वदन्तो हरेयरस्यैतदाज्यं जुहुयात् सुरत्नोत्सृत्य प्राङ्मुख उपविश्य उषाः केतुना जुषतां स्वाहेति। अत्रापि कालात्ययेन शेषं तुल्यं। विशेष
स्क होमान्तरं द्रष्टव्यं तेवरदानमिति। तत्र प्रयोगः। संकल्पान्ते होमकर्ता गार्हपत्य आज्यं संस्कृत्य जुहूं चतुर्गृहीतं गृहीत्वा परिकामिह स्ते
घात। रजतं चान्यहस्ते तत्तो वज्र विहृ आज्ये रजतो चाग्रतो ह्रियमाणे पूर्ववदग्निमुद्धृत्य प्रज्वाल्य तं चंद्ररजतं दूरत्वेन भावयन्। आग्निमाय
तनेनिदध्यात्। ततः कर्ता आहवनीयस्य पुरस्तात्प्रत्यङ्मुख उपविश्य चतुर्गृहीतं जुहुयात्। उषाः केतुना जुषाणा स्वाहेति। प० जु० ५ बस
इदं। न ततः पूर्ववत्कर्ता अग्निहोत्रसोपसादनान्तं कृत्वा भूर्भुवः स्वरिति जपित्वा समिधो दोनादि वरिष्ठं तं कुर्यात्। ततः पूर्ववद्यजमा
नेन वरे दत्ते शेषं समापयेत्। एवं समाप्ताग्निहोत्रे ह्यवाग्निषु मित्राय सूर्याय चेष्टिं कुर्यात्। पूर्णाहुतिं वा कुर्यात्। इष्टिपक्षे तत्र

यो गः मित्रः सूर्य इति प्रधानदेवते · मित्राय व्रीहिमयश्चरुः । सूर्यायैककपालः पौर्णमासतन्त्रं · पंचप्रयाजाः ऽत्रयेनुयाजा इत्यादि · यद्वा

शुनासीरीयगातेमो पंचविध्ये स्वतन्त्रदानव प्रयाजाः नवानुयाजाः ऽपृषदाज्यमिः त्यादि · अभियोमनादि० पृथिवीं ॐ ३ म· ये ३ पजाम

हे मित्रे प्रसमित्रमर्त्तो० दूएनवो ३० मित्रस्याहं देवयज्यया प्रजया० त्सनुमंत्रणं · अथसूर्यस्य · सजोतिरम्भिमो० स्थिरे ३ ॐ ३ म· ये ३

37 यजामहे सूर्यं वहिष्ठमिवि ह० अस्वेनावो ३ दू·पदान एणि विश्वदर्शतो चित्रे देवानामिति शुनासीरीये पर्वणो पाज्यानुवाक्ये इति हो

त्रे लोकाः । सूर्यस्याहं० सूर्यदृशी कामः पासे · पुनरालंभवर्ज्जं संति छृते · पूर्णाहुतियक्षे · मित्राय स्वाहा · सूर्याय स्वाहेति · ततो दंपती

अनश्नंतो वाग्यतो तानेवाग्नी त्समिंधा नावासायमग्नि समीयमासते · अस्तमिते तत्थेवाग्निमुदुग्धेनैव सायंहोमः । तत्र चै

कस्या दुग्धा मधिश्रित्यानासिन्द्धितो पथेन्वाः ययआनयतीति विज्ञेयः । एवं होमपरिसमाप्य दक्षिणाग्न्याहवनीयौ परित्यजेत ·

ततश्चौभूते प्रातरग्निहोत्रं नित्य वह्नत्वा पुनरिह्यार्थमग्नीन्नरणीय अग्नये व्रतभृते पुरोडाशमष्टाकपालं ततश्चोभूते प्रातरग्निहो

नित्यव हुत्वा पुनरिह्यार्थमग्नीन्नरणीय अग्नये व्रतभृते पुरोडाशमष्टाकपालं निर्वपेत · पौर्णमासतन्त्रं · प्रधानमुपांशु · त्वमग्ने व्र

तभृच्छुचिरग्ने देवां इहावह · उपयज्ञं हविश्च नः ॐ ३ मु स्व ३० अग्नये व्रतभृते व्रतानि विभ्रद्व्रतपा अदब्धो यजा नो देवाँ अजरः ।

सुवीरः । दधद्रत्नानि सुमृलीकी अग्ने गोपाय नो जीवसे जातवेदा ३ ऽवो ३ अग्नेर्व्रतभृतो हमन्नादः । पुनरालंभवर्ज्जं संति घ

वै ते· प्रयोगस्तु जिपक्षे अग्नये व्रजे स्वाहेति· प्रातरुद्धरणे रजतहरणे हिरण्यवत् सदर्भमिति सिद्धांतभाष्यकृतः· नैतद् युक्तं मतं· दक्षि
णाग्न्यग्न्यावनुद्धृते स्वावलामिते ह्युदिते वा दक्षिणाग्निं प्रणीय तस्याहवनीयस्थानमिति वदतः प्रायश्चित्तप्रदीपस्य स्वपक्षाश्रयः
पूर्वोक्तं प्रायश्चित्तं दक्षिणाग्नि प्रणयनोत्तरमेवा निमित्ते सतीति तथा चोभयप्रणयनमेवं· पूर्वं दक्षिणाग्निं प्रणयन्याहवनीयस्था
37 य सवितृ प्रणयनादीति· समारूढे नोद्धरः क्षण प्रायश्चित्तं· इत्थमेकाले उद्धरण प्रायश्चित्तविधिः। एवमन्यत्र स्वपक्षे पि विहरणकर्मेण
प्रादुष्करणे कर्तव्यं तदकरणे स्मार्तवदाज्यं संस्कृत्याहवनीये स्रुवाहुतिं जुहुयात्· भूर्भुवः स्वः स्वाहेति पक्षहोमादौ कृते सति तु उदयास्त
मयोः प्रादुष्करणाभावे पि न प्रायश्चित्तं· तस्य होमार्थत्वात्· उभयोः सान्निध्ये तु भाव्यमेव· अथ प्रसंगात् पूर्णाहुतिविधिरभिधीयते·
तत्रैवं त्रातः· कर्तापरिस्तीर्याग्नीन्· ब्रह्मयजमानौ पत्नी च तत्तत्स्थाने उपविश्य गार्हपत्यस्योत्तरतः स्रुवं जुहूं स्थालीं प्रोक्षणीरासा
द्य प्रोक्षणीः संस्कृत्य पात्राणि प्रोक्ष्य गार्हपत्ये आज्यं विलाप्य पवित्रान्तर्हिते निरूप्य स्रुचं स्रुवौ समृज्याहवनीयसमीपे कुशस्त्वे
ध्ममुपसमाधाय स्रुचि गृहीतं गृहीत्वा देवता नाम्ना स्वाहाकारान्तेन यजमानेन त्यागे कृते जान्वाच्य आहुतिं जुहोतीति· इत्थमे
तु सर्वत्र स्मार्तवदाज्यसंस्कारः· अथ यस्य सुप्तस्य सतः सूर्यो विनिम्लोचति सोभिनिम्लुक्तः· यस्य सुप्तस्य सूर्य उदेति सोभ्यु
दितः· एतयोर्मनस्वती होमः प्रायश्चित्तमिति बौधायनः· इदं च प्रबोधोत्तरमेवाहवनीये प्रणीय स्मार्तवदाज्यं संस्कृत्य स्रुचि

ने ह्रि...तगृहीत्वा तेन स्रुवेणाहवनीये जुहोति। मनो ज्योतिर्जुषतामाज्यं० घृतेन स्वाहेति। मनसे ज्योतिष इदं० तमाहवनीयमपवृक्तं एवोक्ता

३८ ...द्धरण प्रायश्चित्तं कुर्यात्। कृते तदुद्धरणे तन्निमित्तायत्तो विहृतत्वादाहवनीये प्रायश्चित्तं कृत्वा नित्यहोमं कुर्यात्॥ आचार्यगृह्यसूत्रेण

३४ दित्यमाह। अव्याधितं चेत्वयं तमादित्योऽभ्यस्तमियादभ्युदियाद्वा ततो नुपविश्या जान्त्रिशो वं भल्लाये न सूर्यज्योतिषा वाधते तत् इति पंचभिरादित्यमुपतिष्ठेत अभ्यु

दियाच्चेदकमेश्वात्तमनमिरूपेण कर्मणां वा पत्त इति समानमुत्तरामिश्चतसृभिरुपस्थानमिति। उत्तराभिर्यस्पते विश्वेत्यादिभिः। एतदाचार्योक्तं

नाहिताग्निमात्रपरं साधारणत्वात्। अथ विहरणप्रक्षेऽन्यनुगमनप्रायश्चित्तं। तदाश्वलायनः। आहवनीये चेद्ध्रियमाणे गार्हपत्योऽनुगच्छेत्स्वे

भ्य एवैनमवक्षाणेभ्यो मंथयेयुरनुगमयित्वेति परं क्षामामाविभस्मना रणी संस्पृश्ये मंथयेदित्येतो नत्रे प्रथममेभ्यो योनिभ्यो अधिजातवेदाः। स

गापत्यान्त्रिशभाजग त्वानुष्टभाच देवेभ्यो हव्यं वहनः प्रजानन्निति समिथित्वा गार्हपत्यायतने निधाय प्रणीयाहवनीयमुपतिष्ठेताग्ने नम

न्तकिये रायेर मखसहसे युम्नायोर्जे पत्याय। सम्राकसि सारस्वतौ त्वोत्सौ प्रावता मन्नो देवान्न पश्चात्यायादधामीति। अवक्षामानि मे

थन समर्थ्यानि दग्ध काष्ठानि। इतर आहवनीयः। समानयोनित्वेद दक्षिणाग्निमपि। संस्पृश्य लेपयित्वा मंथयेदित्राणि वश्वपोगात्प्र कृ

ते कर्मणि पः कर्त्ता स एव मंत्रं ब्रूयात्। येकेचन स मर्था मंथने पुः मंत्रश्चारणी मंथन एव। नानवक्षाममंथने। पपस्छंदने सामान्य

व्य दृव्यस्कंदन त्वापवादे न विशेषमंत्रमप्रभिधानो नावरोहणमंत्रयोरपि भवतीति हृत्तिकारस्याशयं न विप्रः। दक्षिणाग्न्या

हवनीययोरनुगमोत्तरं मंथनमिति दिवत्रातः मंथनोत्तरमनुगमनमिति वृत्तिकृत्. सिद्धांतभाष्यकारस्तु अवक्षाम मंथने यदि इतो जज्ञ इति मंत्र मा
ह. अथ प्रयोगः. आहवनीयदक्षिणाग्न्योर्विद्यमानयोर्गार्हपत्योऽनुगच्छेत् क्षामाय पाणी न्यस्य संततिं दाम्यो मंथनं कुर्यात्. परिक्षामाणि न संतति तदा
प ज्ञमानः भस्म नानारणी संलिप्य इतो जज्ञ इति मंत्रं जपेत्. अन्ये मंथयेयुः ततो दक्षिणाग्न्याहवनीयमुपतिष्ठेत अग्ने सम्राडिति ... इति. न तेष्वि
ष्ट्यग्निपुत पस्वतीष्टिं कुर्यात्. ततोऽग्निहोत्रं. अग्निहोत्रं हुत्वा तपस्वीष्टिरिति केचित्. मंथनोत्तरमाहवनीयप्रणयनमुपस्थानार्थ
मेव. अतो मंथनोत्तरं तमेकं प्रणीयोपस्थाय. अनुगमयित्वा दक्षिणाग्न्याहवनीयौ प्रणये तेष्विष्टिं कुर्यादिति केचित्. न ह्यत्र तपस्वतीष्टिं ते
ननयोयद्धत्वा भवंति. प्रायश्चित्ते समुत्पन्ने एवं हि ता अग्नयो नापहृक्का भवंतीति वृत्तिकृदुक्तेः अथेष्टिप्रयोगः।। दक्षिणाय स्वः इति सेकल्प्याः
अग्निस्तपस्वान् जनद्वान् पावकवान् देवता. अथ कपालः पुरोडाशः पौर्णमासे तंत्रे उपांशु प्रधाने. आयाहि तपसा जनेष्वग्ने पावको
अर्चिषा. उपेमां सुष्टुतिं मम ॐ उपे ३० आ नो याहि तपसा जनेष्वग्ने पावक दीद्यत्. हव्या देवेषु नो दधत् ३० अग्ने तपस्वतो जन
द्वतः पावकवतो हमन्नादः पुनरालेभ वर्जं संतिष्ठते. दक्षिणाग्न्यनुगमेऽप्येषैव. ब्राह्मणे तु गार्हपत्यानुगमने आहवनीये च विद्यमा
ने तु इष्टेतोय लोक तरए न्युक्तानि. उक्तविधमंथनेनाग्न्युत्पत्तिर्नेतरानुगमने इत्याके. पक्षः. अस्मिन्पक्षे नाहवनीयोपस्थानं १
आहवनीयादेव विद्यमानात् प्राग्देशे आहवनीयांतरं प्रणीय तत्रैव दक्षिणाग्निनीयेष्टिरिति द्वितीयः पक्षः अस्मिन्पक्षे ए

पूर्वाहवनीयो गार्हपत्य इति तमिश्रं ते गार्हपत्यायतने क्षिपेत् २ अथवा सह भस्मानमाहवनीयं दक्षिणतो विहारं नीत्वा गार्हपत्या
३९ यतने निधाय तत एव प्रांचमाहवनीयं प्रणीयेष्टिः ॥ आस्मिन्पक्षे आहवनीयोपस्थाने ३ अथवाहवनीयैकदेशं प्रत्यंचं नीत्वा गार्हप
त्यायतने निधायेष्टिः ॥ अत्रापि नाहवनीयोपस्थाने ४ इति चत्वारः पक्षाः ॥ एषु पक्षेषु सहभस्मानमिति पक्षे श्रुते रा
दरो लक्ष्यते । इति प्रणयनपक्षे गार्हपत्यानुगमने प्रायश्चित्ते । असत्याहवनीये गार्हपत्यानुगमनेपि पूर्वोक्तप्रकारेणोत्प
त्तिं कृत्वा तपस्वतीकार्या । उक्तं च भाष्ये । अध्रियमाणे नुगते वानीये गार्हपत्यानुगमनेपि इष्टमिष्टिरिति । एवमेवाजस्त्रगार्ह
पत्यस्यान्वाहितगार्हपत्यस्य वा प्रायश्चित्ते दक्षिणाग्न्यनुगमनेपि स्वयोनौ विहृत्यैसैवेष्टिः कार्येति वृत्तिकृदुक्तेः ॥ सिद्धांतभा
ष्यकृत्तु आचार्यानुक्तत्वाद्दक्षिणाग्न्यनुगमने सर्वप्रायश्चित्तमाह । देवत्रातमते तु स्वशाखीयप्रायश्चित्ताभावे प्यन्यत्र विद्य
मानं चेत्तदेव भवति । तदभावे तु सर्वप्रायश्चित्तं । अतोत्र गृह्यांतरीयं कल्प्यमिति । विद्यमाने गार्हपत्ये सायमग्निहोत्रार्थं प्र
णीत आहवनीयोनुगते प्रायश्चित्तमाह आश्वलायनः । प्रणीते नुगते प्राग्घोमादिष्टिरग्निर्ज्योतिति भ्रान्वरुण इति । अग्निहोत्रा
र्थं प्रणीत आहवनीये नुगते वक्ष्यमाणे यमिष्टिर्भवतीत्यर्थः ॥ प्राग्घोमादिति । पूर्वाहुतिप्रक्षेपात्पूर्वं । उत्पत्तिस्तु । तदाहवनीयस्था
नेमनुध्नमादित्योभ्युदियादिति हिरण्यं पुरस्कृत्य सायमुपरेद्र जातवेदसं निधाय प्रातरुद्धरेदिति ब्राह्मणोक्तेः । इयमेवोत्पत्तिर

स्मिन्नवसरे॰ प्रणीतेवाप्राच्यो मादितिवचनात्॰ अथमन्त्रप्रयोगक्रमः। अनुष्ठरणप्रायश्चित्तवतः॰ बहुविधब्राह्मणोन्योनाम्नतोदर्भैरण्ये
यमारोग्याहवस्यादग्निमुद्धृत्यायतननिधानोनेहुत्वा। ततः कर्ताप्रक्रांतेकर्मसमाप्य अग्नयेज्योतिष्मतेवरुणायचोद्दिश्यपूर्णाहुतिंवाकुर्या
त्॰ प्रातस्त्वचतुर्गृहीतेनरजतेनचक्रीयमारोवहुविस्रणयेन॰ अथाहवनीयस्यपुरस्तात्कर्तोप्रस्तुखउपविश्य उभाःकेतुनानुषतां
स्वाहेतितचतुर्गृहीतेनजुहीयात्॰ उभसद्दे॰। ततः प्रक्रांतंकर्मसमापयेत्॰ सायंकालवदिष्टिः पूर्णाहुतिर्वा अग्निज्योतिष्मान्वरुणश्च
देवता। अग्नयेज्योतिष्मतेशाकपालः वरुणाचरुः पौर्णमासेतंत्रे॰ उदग्नेशुचयस्तवशुक्राभ्राजंतईरते॰ तवज्योतींष्यर्चयः ॐ स॰
ये ॐ अग्निंज्योतिष्मंतेअग्नेब्रह्मन्तुषसाम धूर्ध्वं अस्थान्निर्जगन्वान्तमसोज्योतिषागात्॰ अग्निर्भानुनारुशतास्वंगआत्रातो
विश्वासद्यान्यप्रा ॐ॰वौ ॐ अग्निर्ज्योतिष्मतोहमन्नादः इमंमेवरुण॰ तत्वायामीतिवरुणस्य॰ ॥वरुणस्याहं॰ धर्मभागम्ह
यासे॰ पुनरालेभवर्जसंतिष्ठते॰ पूर्णाहुतिश्चेदग्नयेज्योतिष्मतेस्वाहा॰ वरुणायस्वाहेति॰ अप्यपूर्वाहुतोहुतायामाहवनीया
नुगमनेहिरण्यउत्तरांजुहुयात्॰ परिसमूहनादियथासंभवंतत्रैवकुर्वीत॰ गार्हपत्याहुत्योर्दक्षिणाग्न्याहुत्योरप्येवंतरानत्तदन्य
नुगमनेपिहिरण्यएवोत्तराहुतिसिद्धांतभाष्येहिरण्येनिधानेविशेषमाहदेवव्रातः अग्नेऽभ्यावर्तिन्परियद्विरण्यमन्॰ तंमन्त्रेअमर्त्ये
षु॰ यएनेदूदसदूदेनमर्हतिराज्ञामृत्युर्भवतियोविभर्ति॰ यदेदराज्ञावरुणोयद्वदेवीसरस्वती इंद्रोमवद्धृत्रहावेदतन्मेवर्चे

सआयुषे· नतद्रक्षांसिनपिशाचास्तरंति देवानामोजः प्रथमजंह्येत २ तत्· योबिभर्तिदाक्षायणाहिरण्यंसदेवेषुकृणुतेदीर्घमायुः समनुष्ये
अं· ५० षुकृणुतेदीर्घमायुः· यदाबध्नंदाक्षायणाहिरण्यंशतानीकायसुमनस्यमाना· तन्मआबध्नामिशतशारदायायुष्मांजरदष्टिर्य
थासत्· घृतादुल्लुप्तंमधुमत्सुवर्णंधनंजयंधरुणंधारयिष्णु· ऋणक्सपत्नानधरांश्चकृण्वदारोहमांमहतेसौभगाय· प्रियंमाकुरु
देवेषुप्रियंराजसुमाकुरु· प्रियंविश्वेषुशूद्रेषुमयिधेहिरुचा· अग्निर्येनविराजतिसूर्योयेनविराजति· विराज्येनविराजतिविरासमि
धंकुरु· इतिहिरण्यंनिधाय उत्तरेजुहुयादिति· हिरण्यंनिधायोत्तरे ऽराहुतिहोमेसर्वप्रायश्चित्तंजुहुयात्· इतिभवः आहवनीय
होमोत्तरंगार्हपत्यस्यवादक्षिणाग्नेर्वादक्षिणाग्न्येर्वाभयोर्वानुगमनेतदाहुत्योल्लोपः सर्वप्रायश्चित्तंचेतिविशेषः· तत्र ऽसमासे
होमिगार्हपत्यस्यविधिवदुत्पत्तिः अजस्त्राग्निविहितानांतुसर्वोत्पत्तिः· अत्राथानुगतेष्टिर्भवत्येवेतिवेंकटेशः· अथगार्हपत्याहवनी
योर्युगपन्नाशेदक्षिणाग्निमुद्धास्यगार्हपत्यभस्मनारणीसंस्पृश्यमथित्वापतनेधायाग्निद्वयंप्रणीयसर्वनाशेकंप्रायश्चित्तंकुर्यात्·
गार्हपत्यदक्षिणाग्न्योरनुगमेआहवनीयमुद्धायगार्हपत्यभस्मनारणीसंस्पृश्यमथित्वाग्निंगार्हपत्यायतनेनिधायाग्निद्वयंक्र
मेणप्रणीयसर्वनाशेप्रायश्चित्तंकुर्यात्· दक्षिणाग्न्याहवनीययोर्युगपन्नाशेगार्हपत्यादुभयविहृत्योभयानुगमननिमित्तंप्रा
यश्चित्तंकुर्यात्· सर्वानुगतिरस्ति धा· उदयास्तमयात्प्राकृतकालात्तदूर्ध्वंचेति· तत्राद्येतयोर्भस्मनारण्योः संस्पृश्येत्याहृत्वास

सर्वानुगतिप्रायश्चित्तं कुर्यात्. मध्यमेत्वाग्न्याधेयं पुनराधेयं वा. उदयास्तमयात्पूर्वमग्न्यनुगमे मंथनं कुर्यात्. काले आऽजा
यमाने ग्नौ अनुद्धरणप्रायश्चित्तपूर्वकं काले होमं कुर्यात्. लौकिकाहरणं तु समारूढे विषयं इति निवृत्तं. भाष्यकारादयस्तु
सर्वत्र प्रतिनिधिमाहुः. तत्रोदयास्तमयात्प्राक् मंथनमशक्यं लौकिकाग्निप्रमुखप्रतिनिधिना होमं विधाय प्रतिनिधिमुत्सृज्य
मथिनाग्निपुनाशोकं प्रायश्चित्तं कुर्यात्. सूर्योदयास्तमयात्प्राक् मंथनोपक्रमाभावे त्वग्न्याधेयं पुनराधेयं पुनराधेयं वे
ति. निधिमुत्सृज्य मथिनाग्निपुनाशोकं प्रायश्चित्तं कुर्यात्. सूर्योदयास्तमयात्प्राक् मंथनोपक्रमाभावे त्वग्न्याधेयं पुनराधे
यं पुनराधेयं वेति. सर्वाश्चेदनुगतानादित्योदिस्यदिपाद्यस्तमियाद्वाग्न्याधेयं पुनराधेयं वेत्याश्वलायनस्मरणात्.
अन्वाहितम्न्यनुगमे प्रायश्चित्तविशेषं त्वग्रे वक्ष्यामः. मथ्यमानो ग्निर्जातो पुद्धतश्चेत्तदा समारोपमंत्रं जपित्वा पुनर्मंथ
नं मैथनस्याहृतामं वापेदिति चंद्रिकायां. विहितमंत्राद्यंगेत्येतन्मंथने प्रत्यवरूढो ग्नौ आपतने प्रक्षोपात पूर्वामे पुमतेर
णी एष भस्मनारणी संस्पृशेदिनो जनत्तति मथनं कृत्वाग्राहयत्यापतनेन मथितमग्निं प्रक्षिपेदित्यर्थः. पुरूरवादौ वीत्या
दिना मंथनने ष्ठपितुनरं त्रमं मंनाहृतिरेषा. यदि मथ्यमानो ग्निः प्रणयनकाले न जायेत तदान्यं लौकिकमानी
य प्रणीयतस्यैव होमं कार्यः. अत्र कार्यायत्याधर्मलाभरन्यायातः. प्रणयनमंत्रा भवंति. इति कृन्सतंतु अनुगता

वृजायमाने यावदग्निर्जन्म तावन्मथितव्यमेवततत्स्य स्वतोहिः । ततोनुक्षणायुक्तमंत्राभवेतिः हन्ति श्रित सहितोहोमः । नेत
८१ चोक्ताः सूत्रकारेण अग्निहोत्रायकालेप्यावज्जायमानेप्यनमानीयव्रूहुतुः पूर्वालाभउत्तरोत्तरखाह्मणापाण्यत्रकर्णादमं स्तं
५१ माक्षूकाछेपुपृथिव्याहुत्वात्वीयमंप्यनमिति । तत्रापि शेषंचाहसएव । पाणौचेद्दासेनवरोप्सधः कर्णेचेन्नासव जीवनंस्तं
वेचेन्नाधित्रायीनामश्चेद्विवेकस्यम्न इतत्सांचतस्य व्रतेयावज्जीविकंवेति । अत्रलौकिकाग्निः प्रतिनिधिः सर्वेषामग्नीनां
अजादयस्त्वाहवनीयस्येव । अजाब्राह्मणोयश्वानुरवादक्षिणकर्णहस्तयोहोमइतिधूर्तः ; उद्धरणेधाराकरणंस्पाहयत्वा
वेक्षण अपरयोर्होमः समिदाधानेषष्ठीजलेपूर्णाहुतिः प्रतितपनेचेत्येषांलोपः । नपरिसमूहनावेक्षणयोः उत्तरतः कु
त्रोप्युपसाद्यो मुन्नयानि उयाभिरस्य समिधं स्फोचेत्यादिर्व्दिरसीत्येषांलोपः । नपरिसमूहनावेक्षणयोः उत्तरतः कुशो
प्यस्य । त्येतेभक्षणावेद्यभावात्परिक्रमिंणेस्कचेप्रबुधछेदिदेवत्रातः । सिधोतभाष्यकृतन्निषयायतनेषुत्तयाणांपाण
णयोनिधेयाः विहारायआगारसंवेधोहविः संस्काराः क्रमादिसमार्जेनेसमिधः प्रदीप्तश्चेत्यतेषांतेषइति । पृथिव्याहोमेधा
रणार्थापिसमिन्नेनिहतिकृतः । पाणिहोमेवासार्थोब्राह्मणस्यानवरोधः कर्णेचेदत्रमांसवर्जेस्तेवेचेन्नदर्भारणामधरी
करणेअश्मचेन्नाश्वधशुद्धविसेधः । एतद्व्रतंसंवत्सरपर्यंतंयावज्जीवंवाचरेदितिसूत्रार्थः । लौकिकाग्न्यादिहोमदिने

नानं ते वदेदिति दूपादीनि व्रतानी प्रायश्चित्तमुदपि। यदि लौकिकाग्नाव प्यपतने निहिते प्रणयनात्पूर्वं उदयास्तादौ अनुद्
ए शप्रायश्चित्तं ततो होमः एवं लौकिकाग्न्यादौ होमे कृते पि अन्यमानो गनि द्वितीयको मकालात्प्राग्यदि न जायेत पुनराधानमे
वेति माध्यकृत। दिनीयोपि लौकिकाग्नौ कर्तव्यः। तृतीयकालात्प्रागनुत्पत्तौ पुनराधानमिति केचित्। इत्यनुगमनप्रायश्चि
त्तं। यदि दक्षिणाग्निमनुद्धृत्य अन्यमग्निमाहवनीये प्रणयेत उक्तमंत्रेण विना वाहवनीये प्रणयेत तदा तमग्निं गार्हपत्ये
समोप्याग्नि बहिः पातप्रायश्चित्तं विधाय विधिनाहवनीये प्रणयेदिति गृह्यचरणाः। एवमुद्धरणकालात्पूर्वमेव प्रणीत
योरप्यग्न्योर्बहिः पातप्रायश्चित्तं काले पुनः प्रणयनं च गार्हपत्यायतनेऽग्निमवशिष्टे च प्रणयने प्येवमेव। यद्याहवनी
ये प्रणेते नुगते अन्यस्मादग्नेर्वि ह्रद्धि यता पतापतनस्थमुद्धृत्य पुनरुद्धृतं निदध्यात सर्वप्रायश्चित्तं कुर्यादित्याहुः। प्रयोगमध्ये प्र
धानहोमात्पूर्वस्यां विद्यमानत्वे अन्येनापन्नं प्रणयेत। संसृष्ट एवाग्नौ तत्कर्म समाप्यान्ते पोषितेषु कार्या। असत्वेन्याधानादुद्धृतं
२५ स्याग्नेरायतनं विघमाग्निना संसर्गो पि पूर्वोक्तो दिशीत्याश्वलायनः। आसमिन्यक्षे पूर्वं प्रणीतद्वयापश्चात्त्रीणि गतेऽएवकर्मशेषं समा
प्य बहिः देवयाज्ञिकाः। पश्चादुद्धृतो संसृष्टे अग्नौ पुनर्गार्हपत्ये प्रक्षेप्तव्यः। पूर्वं प्रणीत एव कर्मशेषं समाप्यान्ते बहिः पात नि
मित्तं सर्वप्रायश्चित्तमित्याहुः कात्यायनः। पूर्वं निहितस्य पश्चात्प्रणीतस्य पश्चादुद्धृतं निधापोभयत्र होमः कार्य इति।

आदेखन मतेत: पश्चादधृतोनुगमापितव्या:नेष्टि:। पूर्वप्रणीतेकर्मदेशे यस्मात्सर्वप्रायश्चित्तमात्रे॥ इत्थमेवाहरुद्
४२ दत्तोपि॥ अपवृत्तेकर्मणोनुत्तमिन्नग्नावेवो धृतम्नोत्याकर्मान्तरार्थे अग्न्यंतरप्रणायनेसति संसर्गे विविचयइष्टि:नपूर्वो
42 क्ता॥ अथ संसर्गो णप्राश्चत्ते॥ यत्पृथग्गतोग्न्येकदेशस्तथाविधेनश्रौताग्न्येकदेशेनलौकिकाग्निनावासंसृज्यततन
दानसंसर्गोष्टि: किंतुतत्लंस्पृष्टमंगारं उपेक्ष्यसर्वप्रायश्चित्तमिति शान्तदपीकार:॥ यद्यापतनाद्धृहि:पति तोंगार:कस्येकदेश
दूति नप्रत्यभिज्ञानंतदातमुत्सृज्याज्ञातग्निबहि:पात निमित्तंसर्वप्रायश्चित्तंजुहुयात॥ अग्निवतइष्टो अग्नि रग्निवान्वित॥
ष्टाकपाल:पुरोडाश:॥ अग्निनाग्नि: सामिध्येवेकविगृहपतिर्युवा॥ हव्यवाट्जुहूास्य: ॐ ३० अग्निमग्निवंतत्वे ह्यग्ने
अग्निनाविप्रो विप्रेणसन्त्सता· सखासख्या समिध्यसा ३ इष्टो ३० अग्निरनीकवतोहमन्नाद:·पुनरालभवर्ज्जं संतिष्ठते·
अग्निनाविप्रो विप्रेणसन्त्सता· सखासख्यासमिध्यसा ३ इष्टो ३० अग्निरनीकवतोहमन्नाद:·पुनरालभवर्ज्जं संतिष्ठते·
पूर्णाहुतिर्वा· अग्नये अग्निवतेस्वाहा·विविचेष्टो· अग्निर्विविचद्देवता अष्टाकपाल: पुरोडाश:· नितोविषग्वातजन्तासो
अग्ने मामास: शुचेश्चयः श्वरंति· तुविम्नक्षासो दिव्यानवग्वा वनावनंतिधृषमिरुजंत: ॐ ३०ये ३० अग्निं विविचित्वा
मग्ने मानुषीरीकतेविशोहोत्रा विदं विविचिंरत्नधातमं·गुहासंतुंसुभग विश्वदर्शतंतुविष्वणसंसुपुजं घृतश्रियां ३ वो
३० ३ग्नेर्विविचेरहमन्नाद:·पुनरालभवर्ज्जं संतिष्ठते· पूर्णाहुतिर्वा· अग्नयेविविचयेस्वाहा· अग्नयेविविचद्दे·गा

गार्हपत्यानुगमनमात्रं मंथनविधिनोत्पाद्येतापतनस्य एतद्गार्हपत्यामित्यत्र स्वपरित्यागः सर्वप्रायश्चित्तं वं। अहृतगा
र्हपत्येनुगते सत्यग्न्युद्धवादौ न पुनराधानं। मंथनमनुद्धरणप्रायाश्चित्तमात्रं। आहिताग्निर्विहरणोत्तरमाहोमसमाप्ते
र्व्रतचारी भवेत्। तदाहाचार्याः। अनुद्धृतमाहिताग्निर्व्रतचार्याहोमात् इति। पत्न्यप्येवं अहृतगार्हपत्यस्य दक्षिणाग्नेः आसे आहो
यसमाप्तेः। अत्र सन्निधर्मोऽश्चतुर्मास्यव्रतानि च व्रतशब्देनोच्यन्ते इति शन्तिकृत तत्रान्यथाहाश्वलायनः दीक्षिण्यादि पित्र्या
णां प्रकृतानां च निवृत्तिः सर्वशश्चवर्ज्येयुः ग्रामचर्यां सरणं वितत स्य यनेत्य मिहासनार्थीभिमाषणं अनृते क्रोधमपां प्रग्र
हणमभिवर्षणमारोहणं च वृक्षस्य नावो वा रथस्येत्यादि। चातुर्मास्यव्रतानि च केशान्निवर्तयित केशश्मश्रूणि वापयी
त अधःशायी तमधुमांसलवणस्त्रवलेखना निवर्जयेत् तो भार्याप्युपेयादि नि अवलेखनं केशप्रधानं। एतद्व्रतानि यतो व्रा
तपतीषिः पूर्णाहुतिर्वा प्रायश्चित्तं। तत्प्रयोग भवसाराग्रे वक्ष्यामः अथयथाहिताग्निर्विहरणादूर्ध्वमाहोमसमाप्तेयघ रनीया
त्रमक्षये दान दत्त स्मिन्नेवाग्नौ यन्त्रे वयं पुरुमन्त्रापुष्टिस्ता० विषयाग्ने स्वाहा। पश्चाहत्यघ्न्यदूसवो० तरां न आयुः स्वाहा। इति स्क
वाहुती जुहुयात् समिधो वादध्यात् तज्ज्ञयेष्टा अत्राग्निर्देवता इदमेवाहुका स्थापनोपि। उपसमिंधनादूर्ध्वं सायमहुतेनाप्नी
यादिति। अशनं भक्षणं पानीयलवणार्थं इदम ध्वर्यो रयि भवति। उपसमिं धनसंबंधात्। अथास्तमिते होमः सायंकाली

... सं प्रातस्समोदयं व्युषितउदितेवाउपोदये· आदित्योदयसमीपमित्यर्थः· व्युषिते उषसि अनुदिते इतिपावत· उदिते हुतमनद्यत्य
र्थः इति प्रातर्विकल्पितं कालत्रयं विहितमाचार्येण स्मृतिरूपेणापि· सम्यङ् म्लोचति रवौ सायं वै जुहुयुः सदा· अथ प्रातर्हुते
43 नित्यमुदिते केषांचिद्विधीति कात्यायनोपि· यावत्सम्यङ् न भाव्यंते नभस्यृक्षाः सर्वतः लोहितत्वं च नायैति तावत्सायं तु हूयते
इति मनुः। लेखामात्रस्तु दृश्येत रश्मिभिस्तु समन्वितः। उदितं तं विजानीयात्तत्र होमं प्रकल्पयेदिति· चंद्रिकायां· हस्तादूर्ध्वं रवि
र्यावद्गिरिं हित्वा न गच्छति· तावद्धोमविधिः पुण्य इति· प्रदोषांतो होमकालः संगवांतः प्रातरिति च प्रमाणस्य कालविधानं· अत्रा
नापदि होमे न प्रायश्चित्तं तमतीत्येति विधानात्· अनापदि तु सर्वप्रायश्चित्तं भवेदेव· उत्तरत्र प्रायश्चित्तांतरस्य वक्ष्यमाणत्वात्· ए
वं नित्यहोमे यजमानस्यैव मुख्यं कर्तृत्वं ऋत्विजां देवपितृमनुष्यभृत्यानां तु गौणमेव· तत्राप्यनापदि ऋत्विक्कृतद्वारके होमे सर्वप्रा
यश्चित्तं कर्तव्यं· अत एव स्वयं पर्वणि जुहुयादृत्विजामेकद्वितरं कालमित्यनेन पर्वकालादन्यत्र यजमानकर्तृत्वं व्याहन्यते ने
तरेषु ऋत्विजां निषमनं क्रियते किंतु पर्वकालादन्यत्र गौणकर्तृविधिविधानं किंच नायं भगवत आश्वलायनस्याभिमतोर्थः· य
द्यभिमतस्याद्धै करत्वं स्यात्· अत एवोक्तं स्मृतिचंद्रिकायां· संध्याकर्मावसाने तु स्वयं होमो विधीयते· स्वयं होमफलं यत्स्याद
न्येन न हि लभ्यते होमे यत्फलमुद्दिष्टं। जुहुतः स्वयमेव तु। हूयमाने तदन्येन फलमर्धं प्रयच्छति इति· कर्तृत्वज्ञानं तन्मयमत्याह श्रुतिः। अ

अन्यैः शतहुताधोमादेकः पुत्रहुतोवरं पुत्रैः शतहुधोमादधिकाख्यात्मनः क्रियेति । नचप्रतिनिध्युपादानेप्रायश्चित्तं भिन्नात्सीतीयपरिभा
षिकं विरुध्येतेतिवाच्यं ॥ तस्यमुख्याभावेविधानेनमुख्यसत्वगौणांगीकारप्रायश्चित्तस्यकेनापिदुर्निवारत्वात् ॥ नचपर्वहोमेपि
यजमानसान्निध्येनकर्त्रंतरादानेनियमभंगः ॥ नियमस्यऋतौभार्यागमनस्येवसान्निध्येवशक्तिसत्वेचप्रवृत्तेः तस्मादमाव
दिनायदिस्नानोदयकालमनदत्यप्रदोषसंगवकालेजुहूतां स्वस्यसान्निध्येशक्तौचसत्यां ऋत्विगादिद्वाराजुहूतांचमुख्यद्रव्ये
सतिप्रतिनिधिद्रव्येणजुहूतामिवसर्वप्रायश्चित्तं सिद्धं ॥ पर्वणितुस्वयमजुहूतां विशेषप्रायश्चित्ते ॥ बृहस्पतिराह ॥ आहिताग्नि
रुपस्थानंनकुर्यादिघस्त्रपर्वणि ॥ ऋतौनगच्छेद्भार्यांवासोपिकृच्छ्रार्धमाचरेत् ॥ उपस्थानग्रहणंहोमोपलक्षणार्थमित्यभियुक्ताः
आग्नौचेपिस्वयंहोमेयजमानः ॥ कुर्यात्श्रौतेकर्माणितत्कालंस्नातः शुद्धमनाबुधादितिस्मृतेः ॥ नह्यत्रस्नातकिनःकर्मनिमि
त्तंस्नानंविधीयतेतस्याग्निहोत्रिणंस्नानंत्रिषवणंकुर्यादित्यादेवाग्निहोत्रिणाइतिआश्वलायनोक्त्याप्राप्तत्वात् ॥ इष्ट्यंगत्वे
नस्नानादिपंचकविधान ॥ किंतुस्नातस्ययजमानस्यकर्मकालः कर्मकालेयावच्छुद्धिर्विधीयतेसाचत्यागमात्रेनतुकर्मणीतिवि
ज्ञानेश्वरः तच्चिंत्यं ॥ कर्मवैतानिकंकायेस्नानोयस्यशुद्धोनास्वयंइतिहारितोक्तेः ॥ दर्शेचपौर्णमासेचकर्मवैतानिकंचयत् ॥ सूत
केपित्यजेन्मोहात्प्रायश्चित्तीयतेद्विजइतिमरीचिनाकर्मपरित्यागेदोषाभिधानाच्च ॥ जन्ममहान्योर्वितानस्यकर्मत्यागोनवि

घृतैः॥ शालाग्नौ केवलो होमः कार्य एवान्यगोत्रजैरिति जाबालिनाव्यवच्छायनाः॥ च॥ पत्नीमार्गवेन॥ श्रौते कर्मणि तात्काले स्नातः शुद्धिमवाप्नुया
४४ त्॥ होमं तत्र प्रकुर्वीत शुष्कान्नेन फलेन वा॥ त्रिकांडमंडनः॥ रजोदोषे समुत्पन्ने सूतके मृतके पिवा॥ नित्यं नैमित्तिकं र्याकाम्यं कर्म न किंचनेति॥
